# SANSKRIT

## प्रथम प्रश्न–पत्र : नाटक, प्राचीन काव्य कथा साहित्य एवं अलंकार

**Time Allowed : Three Hours** **Maximum marks : 100**

1. अधोलिखितेषु श्लोकेषु कयोः द्वयोः श्लोक्योः सप्रसंग व्याख्या कार्या–

(क) पूर्व त्वयाप्यभिमतं गतमेवमासी–
च्छ्लाध्यं गमिष्यसि पुनर्विजयेन भर्तुः।
कालक्रमेण जगतः परिवर्तमाना
चक्रारपंक्तिरिव गच्छति भाग्यपंक्तिः।।

(ख) दुःख व्यक्तुं बद्धमूलोऽनुरागः
स्मृत्वा–स्मृत्वा याति दुःखं नवत्वम्।
यात्रा त्वेषा यद् विमुच्येह वाष्पं
प्राप्तानृण्या याति बुद्धिः प्रसादम्।।

(ग) रूपश्रिया समुदितां गुणतश्च युक्तां
लब्ध्वा प्रियां मम तु मन्द इवाद्य शोकः।
पूर्वाभिघातसरुजोऽप्युनुभूतदुःखः
पद्मावतीमपि तथैव समर्थयामि।।

(घ) कः कं शक्तो रक्षितुं मृत्युकाले
रज्जुच्छेदे के पटं धारयन्ति।
एवं लोकस्तुल्यधर्मो वनानां
काले–काले छिद्यते रुह्यते च।। 2×10

2. अधोलिखितानां श्लोकानां कयोः द्वयोः श्लोक्योः सप्रसंगम् अनुवादः विधेयः –

(क) तीर्थोदकानि समिधः कुसुमानि दर्भान्।
स्वैरं वनादुपनयन्तु तपोधनानि।

http://questionpaperesult.com/

Scanned by CamScanner

धर्मप्रिया नृपसुता न हि धर्मपीडा-

मिच्छेत् तपस्विषु कुलव्रतमेतदस्याः।।

(ख) ऋज्वायतां च विरलां व नतोन्नतां च,

सप्तर्षिवंशकुटिलां च निवर्तनेषु।

निर्मुच्यमानभुजगोदरनिर्मलस्य,

सीमामिवाम्बरतलस्य: विभज्यमानाम्।।

(ग) श्लाघ्यामवन्तिनृपते: सदृशीं तनूजां

कालक्रमेण पुनरागतदारभारः।

लावाणके हुतवहेन हृताङ्गयष्टिं

तां पद्मिनीं हिमहतामिव चिन्तयामि।।

(घ) प्रच्छाद्य राजमहिषीं नृपतेर्हितार्थं

कामं मया कृतमिदं हितमित्यवेक्ष्य।

सिद्धेऽपि नाम मम कर्मणिपार्थिवोऽसौ

किं वक्ष्यतीति हृदयं परिशङ्कितं मे।। 2×5

3. अधोलिखितेषु प्रश्नेषु केषाञ्चित्, पञ्चानां प्रश्नानां संस्कृतभाषायाम् उत्तराणि देयानि-

(i) 'स्वप्नवासवदत्तम्' इत्यस्य नाटकस्य लेखकः कोऽस्ति?

(ii) 'स्वप्नवासवदत्तम्' इत्यस्मिन् नाटके कति अङ्काः सन्ति?

(iii) कतमम् अङ्कमाश्रित्य 'स्वप्नवासवदत्तम्' इति नामकरणं कृतम्।

(iv) वासवदत्तायाः जनकः कः आसीत्?

(v) पद्मावती कस्य भगिनी आसीत्?

(vi) कस्य रक्षणम् अति कठिनं भवति?

(vii) यौगन्धरायणः कः आसीत्?

(viii) वासवदत्तायाः वीणायाः किं नाम आसीत्?

(ix) पद्मावत्याः शयनीयं कुत्र रचितम्?

(x) आदिरूपककारः कोऽस्ति? 5×2

4. अधोलिखितश्लोकेषु कयोः द्वयोः श्लोकयोः सप्रसंग व्याख्या करणीयाः

(क) स च सर्वगुणोपेतः कौशल्यानन्दवर्धनः।

समुद्र इव गाम्भीर्ये धैर्येण हिमवानिव।।

(ख) जनकस्य कुले जाता देवमायेव निर्मिता।

सर्वलक्षणसम्पन्ना नारीणामुत्तमा वधूः।।

(ग) शबर्या पूजितः सम्यग्रामो दशरथात्मजः।

पम्पातीरे हनुमता सङ्गतो वानरेण ह।।

(घ) न पुत्रमरणं केचिद् द्रक्ष्यन्ति पुरुषाः क्वचित्।

नार्यश्चाविधवा नित्यं भविष्यन्ति पतिव्रताः।। 2×5

5. पञ्चलघुत्तरात्मकानां प्रश्नानाम् उत्तराणि संस्कृतभाषायां देयानि-

http://questionpaperresult.com/

Scanned by CamScanner

(i) आदिकविः कोऽस्ति ?
(ii) रामस्य जन्म् कस्मिन् वंशेऽभवत् ?
(iii) शृङ्वेरपुरस्य अधिपतिः कः आसीत् ?
(iv) वरद्वयं कया याचितम् ?
(v) सुतं विलपन् कः स्वर्गं जगाम ?
(vi) हनुमान् लङ्कायां सीतां कुत्र ददर्श ?
(vii) रामस्य वनवासकाले भरतः कुत्र न्यवसत् ?
(viii) रामे पृथिव्याः समः कः गुणः आसीत् ?
(ix) जनस्थाननिवासिनी का राक्षसी विरूपिता ?
(x) कस्य राज्ये सर्वे जनाः नित्यं प्रमुदिताः ? 5×2

6. सप्रसङ्गम् अनुवादः करणीयः –

(क) अस्ति मगधदेशे चम्पकवतीनाम अरण्यानी। तस्यां चिरान्महता स्नेहेन मृगकाकौनिवसतः। स च मृगः स्वेच्छया ग्राम्यन् हृष्टपुष्टाङ्गः केनचित् शृगालेनाऽवलोकितः। तं दृष्ट्वा शृगालोऽचिन्तयत् – आः। कथमेतन्मांसं सुललितं भक्षयामि ? भवतु, विश्वासं तावदुत्पादयामिं – इत्यालोच्यउपसृत्याऽब्रवीत् – 'मित्र! कुशलं ते ?' मृगेणोक्तम् – 'कस्त्वम् ?' स ब्रूते – 'क्षुद्रबुद्धिमाना जम्बुकोऽहम्।' अत्रारण्ये बन्धुहीनो मृतवत् एकाकी निवसामि। इदानीं त्वां मित्रमासाद्य पुनः सबन्धुर्जीवलोके प्रविष्टोऽस्मि। अधुना तवानुचरेण
मया सर्वथा भवितव्यम्। मृगेणोक्तम् – 'एवमस्तु।' 12

**अथवा**

अथ प्रभाते स क्षेत्रपतिर्लगुडहस्तस्तं प्रदेशम् आगच्छन् काकेनाऽवलोकितः। तमवलोक्य काकेन उक्तम् – 'सखे मृग! त्वमात्मानं मृतवत्सन्दर्श्य वातेनोदरं पूरयित्वा पादान् स्तब्धीकृत्य तिष्ठ। अहं तव चक्षुषी चञ्चवा किमपि विलिखामि। यदा अहं शब्दं करोमि तदात्वमुत्थाय सत्वरं पलायिष्यसे। मृगस्तथैव काकवचनेन स्थितः। ततः क्षेत्रपतिना हर्षोत्फुल्ललोचनेन तथाविधो मृग आलोकितः। 'आः स्वयं मृतोऽसि' – इत्युक्त्वा मृगं बन्धनान्मोचयित्वा पाशान्संवरीतुं सयत्नो बभूव। ततः कियद् दूरे अन्तरिते क्षेत्रपतौ स मृगः काकशब्दं श्रुत्वा सत्वरमुत्थाय पलायितः। तमुद्दिश्य तेन क्षेत्रपतिनां प्रकोपात् क्षिप्तेन् लगुडेन शृगालो व्यापादितः। 12

(ख) उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः
दैवेन देयमिति कापुरुषा वदन्ति।
दैवं निहत्य कुरु पौरुषमात्मशक्त्या
यत्ने कृते यदि न सिद्ध्यति कोऽत्र दोषः ।। 10

**अथवा**

तानीन्द्रियाण्यविकलानि तदेव नाम
सा बुद्धिप्रतिहता वचनं तदेव।

http://questionpaperesult.com/

Scanned by CamScanner

अर्थोष्मणा विरहितः पुरुषः स एव

अन्यः क्षणेन भवतीति विचित्रमेतत्।। 10

7. अधोलिखितेषु अलंकारेषु अलंकारत्रयस्य लक्षणम् उदाहरणं लक्षणसंगतिकरणं च करणीयम् –

| | | | |
|---|---|---|---|
| (क) | अनुप्रासः | (ख) | उपमा |
| (ग) | रुपकम् | (घ) | व्यतिरेकः |
| (ङ) | अर्थान्तरन्यासः | (च) | सन्देहः |

3×6

http://questionpaperesult.com/

Scanned by CamScanner